**Series G7DEF** **SET-4**

प्रश्न-पत्र कोड
Q.P. Code **65**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

**नोट**

*(I)* *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।*

*(II)* *प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।*

*(III)* *कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।*

*(IV)* ***कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें ।***

*(V)* *इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।*

**NOTE** [ ]

*(I)* *Please check that this question paper contains **15** printed pages.*

*(II)* *Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.*

*(III)* *Please check that this question paper contains **18** questions.*

*(IV)* *Please write down the Serial Number of the question in the answer-book at the given place before attempting it.*

*(V)* *15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.*

# संस्कृतम् (सम्प्रेषणात्मकम्)

# SANSKRIT (Communicative)

*अवधि : होरात्रयम्* *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* *अधिकतम अंक : 80*

*Time allowed : 3 hours* *Maximum Marks : 80*

***General Instructions :***

*This question paper is divided into* ***four*** *sections.*
*It has total* ***18*** *questions.*
***Section 'A'*** *: 1 question no. 1.*
***Section 'B'*** *: 3 questions no. 2 to 4.*
***Section 'C'*** *: 7 questions no. 5 to 11.*
***Section 'D'*** *: 7 questions no. 12 to 18.*
*Attempt questions as per specific instructions.*
*Write question no. in Answer Book before attempting it.*

***सामान्य निर्देशा :***

*प्रश्नपत्रे* ***चत्वार:*** *भागाः सन्ति ।*
*प्रश्नपत्रे समेत्य* ***(18)*** *अष्टादशप्रश्नाः सन्ति ।*
***भागः 'क'*** *– 1 – प्रश्नसंख्या 1.*
***भागः 'ख'*** *– 3 – प्रश्नसंख्या 2 तः 4 पर्यन्तम् ।*
***भागः 'ग'*** *– 7 – प्रश्नसंख्या 5 तः 11 पर्यन्तम् ।*
***भागः 'घ'*** *– 7 – प्रश्नसंख्या 12 तः 18 पर्यन्तम् ।*
*प्रश्नानामुत्तराणि निर्देशानुसारं संस्कृतेन लेखनीयानि ।*
*प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।*

**भागः 'क'** ***[10 अङ्काः]***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

भारतीयसंस्कृति: विश्वे प्राचीनतमा महानतमा च संस्कृतिरिति यत्र आध्यात्मिकता, नैतिकता, साधना करुणा च प्रमुखतया प्रतिष्ठिता: । सा केवलं आचारव्यवहाररूपा न, अपितु जीवनस्य सर्वाङ्गसमन्वितदर्शनरूपा अस्ति । वेदा:, उपनिषद:, पुराणानि स्मृतय: च अस्या: संस्कृते: अमूल्यनिधय: सन्ति । भारतीयसंस्कृते: मूलतत्त्वम् "सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:" 'वसुधैव कुटुम्बकम्' च इति यत्र समस्तं जगत् एकं कुटुम्बम् इव मन्यते । अस्मिन् देशे विविधा: आस्था:, भाषा: परम्परा: च सन्ति तथापि सर्वे एकेन सूत्रेण बद्धा: सन्ति । भारतीयसंस्कृतौ सहिष्णुता, अहिंसा, सत्यनिष्ठा, करुणा, दया आत्मसंयम: च प्रमुखतया निर्दिष्टा: । कला, संगीतं, नृत्यं, काव्यं, स्थापत्यकला मूर्तिकला च भारतीयसंस्कृते: अविभक्तानि अङ्गानि । भरतमुनिना रचितं नाट्यशास्त्रम्, पाणिने: व्याकरणम्, कालिदासस्य काव्यानि, आयुर्वेदस्य शास्त्राणि पतञ्जलिमुनिना प्रतिपादित: योगदर्शन: च एते सर्वे ग्रन्था: जगत: कल्याणाय निरन्तरं प्रदीपा: इव विराजन्ते । अद्यापि अस्माकं संस्कृते: प्रभाव: सम्पूर्णे विश्वे दृश्यते । योग:, ध्यानम्, आयुर्वेद:, गीता इत्यादय: विषया: विश्वमानवजीवनस्य पथप्रदर्शका: सन्ति । अत: अस्माभि: एतस्या: भारतीयसंस्कृते: केवलं गुणगौरवगानं न कर्तव्यम्, अपितु संरक्षणं संवर्धनं च अनिवार्यतया कर्तव्यम् । एषा संस्कृतिरेव अस्माकं राष्ट्रस्य आत्मा, मानवजीवनस्य आधार: विश्वकल्याणस्य च प्रेरणास्रोत: ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) *2×1=2*

(i) का विश्वे प्राचीनतमा ?

(ii) कस्या: प्रभाव: सम्पूर्णे विश्वे दृश्यते ?

(iii) केन नाट्यशास्त्रम् रचितम् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) *2×2=4*

(i) संस्कृते: अमूल्यनिधय: के के सन्ति ?

(ii) ग्रन्था: किमर्थं प्रदीपा: इव विराजन्ते ?

(iii) अस्माभि: किं कर्तव्यम् ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'अस्या: संस्कृते: अमूल्यनिधय: सन्ति' अत्र किं क्रियापदम् ?

(A) सन्ति

(B) अमूल्यनिधय:

(C) अस्या:

(D) संस्कृते:

(ii) 'समस्तम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) कुटुम्बम्

(B) धैर्यम्

(C) जगत्

(D) दया

(iii) 'हिंसा' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(A) आत्मा (B) असंभवम्

(C) आस्था (D) अहिंसा

(iv) 'सर्वे सन्तु निरामया:' अस्मिन् वाक्ये कर्तृपदं किम् ?

(A) सर्वे (B) सन्तु

(C) निरामया: (D) कोऽपि न

### भागः 'ख' [15 अङ्काः]

### रचनात्मकं-कार्यम्

**2.** भवत: नाम दिव्यम्। भवत: विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत्। तदर्थं मित्रं कृष्णं प्रति लिखितं पत्रं मञ्जूषात: पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत : $10\times\frac{1}{2}=5$

मानसविद्यालय:,

(i) ____________

दिनाङ्क: ____________

प्रिय मित्र (ii) ____________

(iii) ____________

अत्र कुशलं तत्रास्तु । इदं ज्ञात्वा त्वं प्रसन्न: भविष्यसि यत् गतसप्ताहे मम विद्यालये (iv) ____________ आयोजित: । अस्मिन् उत्सवे मम कक्षाया: छात्रा: पाठ्यपुस्तकस्य 'न धर्मवृद्धेषु वय: समीक्ष्यते' इति नाटकस्य (v) ____________ अकुर्वन्। अहं तस्मिन् नाटके 'अष्टावक्रस्य' अभिनयं कृतवान्। मम अभिनयं दृष्ट्वा (vi) ____________ आनन्दिता: भूत्वा करतलध्वनिं कृतवन्त: येन मम (vii) ____________ अपि अभवत्। कार्यक्रमस्य अन्ते मुख्यातिथिमहोदयेन संस्कृतनाटकस्य (viii) ____________ कृता । उत्सवे गायनं, भाषणं नृत्यप्रस्तुति: चापि अभवन्। वस्तुत: अयम् उत्सव: मनोरञ्जकं ज्ञानवर्धकं च आसीत्। भवान् स्वविद्यालयस्य विषये अपि मां लिखतु।

मातृपितृचरणेषु (ix) ____________ प्रणामा: ।

तव मित्रम्

(x) ____________

**मञ्जूषा**

| |
|---|
| संस्कृतोत्सव:, प्रशंसा, दर्शका:, आगरात:, मम, दिव्यम्, कृष्ण !, उत्साहवर्धनम्, नमोनम:, मञ्चनम्। |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

| |
|---|
| बालकौ, दर्शनीयस्थलम्, पुष्पाणि, वृक्षाः, खेलतः, वातावरणम्, सर्वत्र, पश्यन्ति, स्वच्छता, मार्गम्, जनाः, जले, रक्तवर्णस्य, आकाशे, दृश्यते, प्रसिद्धम् । |

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत : *5×1=5*

**'प्रदूषणम्'**

**मञ्जूषा**

| |
|---|
| वृक्षाः, स्वच्छम्, पर्यावरणम्, अस्ति, जीवनम्, प्राणवायुः, सर्वत्र, आरोपणीयाः, सर्वकारः, जनाः, सर्वे, भवेयुः, जागरूकाः, प्रयासम्, वाहनानाम्, प्रदूषणम्। |

**4.** अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत : $10 \times \frac{1}{2} = 5$

एकस्मिन् ग्रामे एक: (i) ________ निवसति स्म । एकदा तस्य गृहे (ii) ________ मित्रं आगच्छति यत् नगरे निवसति स्म । भोजनकाले मूषक: स्वमित्रं खादितुं (iii) ________ चणकान् च प्रायच्छत् । नगरस्य मूषक: अकथयत् – "नगरे भोजनं (iv) ________ भवति, तत्र भोजने (v) ________ व्यंजनानि भवन्ति' इति । सोऽपि तं नगरम् आगन्तुं कथयति । तदन्तरं (vi) ________ ग्रामस्य मूषक: नगरम् आगच्छत् । नगरे आगत्य मूषक: (vii) ________ अभवत् । तौ एकस्य धनिकस्य गृहे निवसत: स्म । भोजनकालात् पश्चात् स्थाल्यां अवशिष्टं स्वादिष्टं भोजनमासीत् । यदा तौ खादितुम् आरभताम् तदैव तत्र एक: (viii) ________ तौ आक्रम्यत् तेषां भोजनं चापि खादितवान् । ग्रामस्य मूषक: भयभीत: (ix) ________ च अभवत् अकथयत् च – मम ग्राम: एव श्रेष्ठ:, तत्र शान्ति: अस्ति न तु विडालस्य (x) ________ ।

**मञ्जूषा**

| |
|---|
| एकदा, अतिप्रसन्न:, फलानि, क्रोधित:, विविधानि, मूषक:, भयम्, सुस्वादु, एकम्, विडाल: । |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : $5 \times 1 = 5$

(अध्यापक: कक्षां प्रविशति)

*छात्रा:* – सुप्रभातम् महोदय !

*अध्यापक:* – (i) ____________ ।

*छात्रा:* – महोदय ! अद्य वयं किं पठिष्याम: ?

*अध्यापक:* – अद्य वयं न पठिष्याम: अपितु क्रीडां क्रीडिष्याम: ।

*आनन्द:* – (ii) ____________ ।

*अध्यापक:* – आम् छात्रा: ! वयं भाषाक्रीडां क्रीडिष्याम: ।

*छात्रा:* – (iii) ____________ ।

*अध्यापक:* – बालका: ! श्व: संस्कृतदिवस: अस्ति अत: अस्माभि: उत्सव: मान्यते अद्य ?

*आनन्द:* – (iv) ____________ ।

*अध्यापक:* – मोहन ! त्वम् अपि मित्रै: सह किञ्चिद् करिष्यसि ?

*मोहन:* – श्रीमन् ! वयम् सर्वे मिलित्वा उत्साहेन अस्य दिवसस्य आयोजनं करिष्याम: ।

*अध्यापक:* – (v) ____________ ।

### मञ्जूषा

- अहो ! अस्मिन् उत्सवे अहम् एकं संस्कृतगीतं गास्यामि।
- सुप्रभातं छात्रा: ! यूयम् सर्वे उपविशत।
- महोदय ! किं सत्यम् ?
- शोभनम् ! अहं प्रसन्न: अस्मि। स्वस्ति युष्मभ्यम्।
- महोदय ! अद्य क: विशेष: यत् वयं न पठिष्याम: अपितु क्रीडिष्याम: ?

**भागः 'ग'** *[25 अङ्काः]*

## अनुप्रयुक्त-व्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) प्रभो + अत्र कथम् आगत: ?

(ii) इत्युक्ति: तत्कृतज्ञता।

(iii) सरस्वत्या: कोश: सम् + चयात् क्षीण: भवति।

(iv) जगत्पते: सृष्टिरेषा रमणीया।

(v) पिता अस्य किं तप: + तेपे ?

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत :
(केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) मदोद्धता: कपय: प्रहस्य अवदन्।

(A) मदेन उद्धता: (B) मदात् उद्धता:

(C) मदस्य उद्धता: (D) मदाय उद्धता:

(ii) अनृतं वदसि चेत् काक: दशेत्।

(A) अ नृतम् (B) अन ऋतम्

(C) न ऋतम् (D) अन नृतम्

(iii) मिथुन: एक: विशिष्ट: राज्ञ: पशु: अस्ति।

(A) राजपशव: (B) राजपशु:

(C) राजा पशु: (D) राजा पशु: च

(iv) तत: प्रविशत: व्यास: च नारद: च।

(A) व्यासनारदा: (B) व्यासनारदम्

(C) व्यासनारद: (D) व्यासनारदौ

(v) यथोचितं क्रियताम्।

(A) यथा समीपम् (B) उचितम् अनतिक्रम्य

(C) उचितेन सह (D) यथा अनतिक्रम्य

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) वयम् अत्रत्यानाम् ऐतिहासिक-स्थलानां विषये ज्ञातुम् इच्छाम:।

(A) ऐतिहास + ठक् (B) इतिहास + ठक्

(C) इतिहास + इक (D) ऐतिहास + इक

(ii) परिश्रमस्य महत्त्वं को न जानाति ?

(A) महत् + त्व (B) महत् + मतुप्

(C) महत् + तुमुन् (D) महत् + तल्

(iii) मे दग्धा: घोटका: कथं रक्षणीया: ?

(A) रक्ष् + अनीयर् (B) रक्ष् + तव्यत्

(C) रक्ष् + मतुप् (D) रक्ष् + टाप्

(iv) मनस: चञ्चल + तल् क: निरोद्धुं क्षम: ?

(A) चञ्चलताम् (B) चञ्चलता

(C) चञ्चलतया (D) चञ्चलतायाम्

(v) मयूरस्य पिच्छानाम् मनोहारिन् + ङीप् शोभा सर्वेभ्य: रोचते।

(A) मनोहारि (B) मनोहारिणी

(C) मनोहारिन् (D) मनोहरम्

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत :
(केवलं प्रश्नत्रयम्) *3×1=3*

*प्रधानाचार्य:* – किम् छात्रा: प्रार्थनां कुर्वन्ति ?

*मानव:* – आम् ! छात्रै: (i) ____________ क्रियते।

*प्रधानाचार्य:* – किम् सर्वे प्रार्थनासभायाम् अनुशासनेन तिष्ठन्ति ?

*मानव:* – आम् ! (ii) ____________ अनुशासनेन स्थीयते।

*प्रधानाचार्य:* – किम् तत्र एका छात्रा गीतं गायति ?

*मानव:* – आम् ! तत्र एकया छात्रया गीतं (iii) ____________ ।

*प्रधानाचार्य:* – किम् अतिथिना अपि तत्र आगम्यते ?

*मानव:* – स: अपि किंचिद् कालान्तरं तत्र (iv) ____________ ।

**मञ्जूषा**

| |
|---|
| गीयते, सर्वै:, आगमिष्यति, प्रार्थना। |

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) विद्यालये प्रात: 7:45 __________ वादने छात्रा: आगच्छन्ति।

(ii) तत: 8:00 __________ वादने प्रार्थना भवति।

(iii) तदनन्तरं 10:30 __________ वादने अर्धावकाश: भवति।

(iv) अपराह्णे 2:15 __________ वादने पूर्णावकाश: भवति।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) स पापकर्मा __________ गत: इति न जानीम:।

(ii) लोहितजनपदे __________ अनेके बौद्धविहारा: सन्ति।

(iii) वनौषधीनां तु अयं स्रोत: __________ ।

(iv) अस्य पिता किं तप: तेपे __________ उक्ति: तत्कृतज्ञता।

(v) __________ तु वयम् एतानि स्थलानि द्रष्टुं तत्परा:।

**मञ्जूषा**

| |
|---|
| इति, एव, अपि, कुत्र, सम्प्रति। |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) अपूर्वा कोश: विद्यते तव भारति।

(A) अपूर्व: (B) अपूर्वम्

(C) अपूर्वा: (D) अपूर्व

(ii) स: भवते चक्षुर्द्वयं प्रयच्छामि।

(A) वयम् (B) अहम्

(C) आवाम् (D) त्वम्

(iii) अलम् अलं मिथ: कलहम्।

(A) कलहानि (B) कलहेन

(C) कलहाय (D) कलहे

(iv) मदोद्धता: कपय: अवदत्।

(A) अवदन् (B) अवदताम्

(C) अवद: (D) अवदम्

भागः 'घ' [30 अङ्काः]

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थमूलं च खनित्वा तं सुवर्णकलशं प्राप्तवान्। यदा सः तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति। भीतः सः कलशं पुनः आवृत्य तं च आदाय मित्रस्य गृहं समागतः। स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान्। विचित्रा खलु दैवगतिः। पतितात् कलशात् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान्। कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोकयन्तौ अतिष्ठताम्।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कः सुवर्णकलशं प्राप्तवान्?

(ख) विषधरः कं दष्टवान्?

(ग) दुष्टबुद्धिः स्वमित्रं केन मारयितुम् इच्छति?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) भीतः सः कलशम् आदाय कुत्र समागतः?

(ख) दुष्टबुद्धिः कलशं गृहाभ्यन्तरे किमर्थं क्षिप्तवान्?

(ग) तौ दम्पती आश्चर्येण किम् अपश्यताम्?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'अतिष्ठताम्' क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(ख) 'दैवगतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

(ग) 'सर्पम्' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

**13.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

चञ्चलं हि मन: कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) चञ्चलं किम् अस्ति ?

(ख) प्रथमे श्लोके सम्बोधनपदं किमस्ति ?

(ग) अत्र 'महाबाहो' इति सम्बोधनं कस्मै अस्ति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) मन: काभ्यां गृह्यते ?

(ख) कस्य निग्रहं सुदुष्करं भवति ?

(ग) अभ्यासेन वैराग्येण च किं वशं गच्छति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) "तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।" अत्र वाक्ये क्रियापदं किम् ?

(ख) 'सुकरम्' इत्यस्य किं विपर्ययम् अत्र प्रयुक्तम् ?

(ग) 'दुर्निग्रहम्' इत्यस्य विशेषणपदस्य किं विशेष्यपदं अत्र प्रयुक्तम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

*काक:* – (प्रविश्य, सक्रोधम्) आ: ! किम् उक्तवती भवती ? यदि अहं कृष्णवर्ण: तर्हि श्रीरामस्य वर्ण: कीदृश: ? श्रीवासुदेवस्य वर्ण: कीदृश: ? मुग्धे ! अहं तु अतीव कर्तव्यपरायण: । प्रभाते 'का-का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि ।

*राजहंस:* – हुं ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति ।

*काक:* – (विहस्य) कुक्कुट: । अरे अद्य कुत: कुक्कुटा: नगरेषु । अहमेव सर्वत्र सुलभ: ।

*राजहंसी* – भो भो वाचाल ! स्वीयै: कटुभि: क्वणितै: जनजागरणात् अन्यत् तु किमपि न करोषि ?

*काक:* – अहो अज्ञानं भवत्या: ! अरे ! यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जना: प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति । किं बहुना ! अहम् तु एतादृश: सत्यप्रिय: यत् मातर: शिशून् कथयन्ति – "अनृतं वदसि चेत् काक: दशेत् ।" अस्माकं ऐक्यं तु जगत्प्रसिद्धम् । सर्वथा जागरूकोऽहं छात्राणाम् कृते आदर्श: एव ।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) केषां ऐक्यं जगत्प्रसिद्धम् ?

(ख) राजहंसी काकं किं सम्बोधयति ?

(ग) कुक्कुटा: कुत्र न दृश्यन्ते ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) मातर: काकविषये शिशून् किं कथयन्ति ?

(ख) काक: केषां कृते आदर्श: एव ?

(ग) काक: प्रभाते किं करोति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'कार्येषु' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(ख) 'हृष्यन्ति' इति क्रियापदस्य कर्तृपदं किम् अत्र प्रयुक्तम् ?

(ग) 'कटुभि:' इत्यस्य पदस्य विशेष्यपदं चित्वा लिखत ।

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत : (केवलं पञ्चप्रश्ना:) $5\times1=5$

(i) सर्प: कलशात् बहि: निर्गत: ।

(ii) भारत्या: कोश: अपूर्व: ।

(iii) विषादं त्यक्त्वा उद्यम: क्रियताम् ।

(iv) पापकर्मणा द्रौणिना मे पुत्रा: हता: ।

(v) दानशालासु विचरन् राजा अचिन्तयत् ।

(vi) वनौषधीनाम् तु अयं स्रोत: एव अस्ति ।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।

प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ।।

**अन्वय:**

यथा (i) __________ वाणी पुरुषं प्रह्लादयति तथा न शीतल (ii) __________ न चन्दन (iii) __________ न च (iv) __________ छाया (पुरुषं प्रह्लादयति)।

**मञ्जूषा**

| |
|---|
| सलिलम्, रस:, शीतला, मधुरभाषिणी। |

**अथवा**

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

तदेवाहु: महात्मान: समत्वमिति तथ्यत: ।।

**भावार्थ :**

यथा (i) __________ सरलता भवति तथैव (ii) __________ अपि यदि सरलता भवेत् तदा एव (iii) __________ वास्तविकरूपेण तत् (iv) __________ इति कथयन्ति।

**मञ्जूषा**

| |
|---|
| वाण्याम्, समत्त्वम्, महात्मान:, मनसि। |

**17.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत :

(केवलं प्रश्नचतुष्टयम्) $4\times1=4$

(i) <u>अमात्या:</u> तदैव अवदन्।

(A) मन्त्रिण: (B) सेवका:

(C) सैनिका: (D) जना:

(ii) अनृतं वदसि चेत् काकः दशेत्।

(A) अन्यथा (B) अहितम्

(C) हितकारी (D) असत्यम्

(iii) वानरयूथपति: सर्वान् कपीन् रहसि अवदत्।

(A) रहस्यम् (B) एकान्ते

(C) वने (D) राजभवने

(iv) समीचीनं न कृतं भवता।

(A) उचितम् (B) अनुचितम्

(C) अशुद्धम् (D) अपूर्वम्

(v) अन्येषां वदने ये ते चक्षुनामनी मते।

(A) वाचि (B) मुखे

(C) नेत्रम् (D) मस्तके

**18.** अधोलिखितां कथां मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत : $8\times\frac{1}{2}=4$

वने सर्वे पशव: पक्षिण: च वनस्य (i) __________ भवितुं स्वप्रशंसां कुर्वन्त: परस्परं विवादम् आरभन्त। ते स्वमहत्त्वं प्रतिपादयन्त: परेषाम् (ii) __________ अपि कृतवन्त:। सर्वेषां कलहम् अवेक्ष्य अन्ते (iii) __________ आगच्छति। सा सर्वान् सस्नेहं वदति यत् अहम् प्रकृति: युष्माकम् (iv) __________ अस्मि। युष्माभि: एव मम शोभा। यथासमयं सर्वेषां (v) __________ भवति। सर्वेषु प्राणिषु कोऽपि भेद: न अस्ति अत: (vi) __________ विवादेन च (vii) __________ व्यर्थम् न कुरुत। यूयं सर्वे मिलित्वा परस्परं (viii) __________ निवसथ जीवनं च रसमयं कुरुथ।

**मञ्जूषा**

| |
|---|
| कलहेन, आनन्देन, माता, राजा, महत्त्वम्, अपमानम्, समयम्, प्रकृतिमाता। |